# Devibhujangastotram

# દેવીભુજંગસ્તોત્રમ્

## Document Information

Text title : devIbhuja.ngastotram

File name : devibhujanga.itx

Category : devii, pArvatI, bhujanga, devI, shankarAchArya

Location : doc_devii

Author : Shankaracharya

Transliterated by : Sridhar Seshagiri seshagir at engineering.sdsu.edu

Proofread by : Sridhar Seshagiri seshagir at engineering.sdsu.edu

Latest update : August 23, 2000

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 2, 2024

*sanskritdocuments.org*

# દેવીભુજંગસ્તોત્રમ્

॥ શ્રીઃ ॥

॥ અથ દેવીભુજંગસ્તોત્રમ્ ॥

વિરિઞ્ચ્યાદિભિઃ પઞ્ચભિર્લોકપાલૈઃ
સમૂઢે મહાનન્દપીઠે નિષણ્ણમ્ ।
ધનુર્બાણપાશાઙ્કુશપ્રોતહસ્તં
મહસ્ત્રૈપુરં શંકરાદ્વૈતમવ્યાત્ ॥ ૧॥

યદન્નાદિભિઃ પઞ્ચભિઃ કોશજાલૈઃ
શિરઃપક્ષપુચ્છાત્મકૈરન્તરન્તઃ ।
નિગૂઢે મહાયોગપીઠે નિષણ્ણં
પુરારેરથાન્તઃપુરં નૌમિ નિત્યમ્ ॥ ૨॥

વિરિઞ્ચાદિરૂપૈઃ પ્રપઞ્ચે વિહૃત્ય
સ્વતન્ત્રા યદા સ્વાત્મવિશ્રાન્તિરેષા ।
તદા માનમાતૃપ્રમેયાતિરિક્તં
પરાનન્દમીડે ભવાનિ ત્વદીયમ્ ॥ ૩॥

વિનોદાય ચૈતન્યમેકં વિભજ્ય
દ્વિધા દેવિ જીવઃ શિવશ્ચેતિ નામ્ના ।
શિવસ્યાપિ જીવત્વમાપાદયન્તી
પુનર્જીવમેનં શિવં વા કરોષિ ॥ ૪॥

સમાકુઞ્ચ્ય મૂલં હૃદિ ન્યસ્ય વાયું
મનો ભ્રૂબિલં પ્રાપયિત્વા નિવૃત્તાઃ ।
તતઃ સચ્ચિદાનન્દરૂપે પદે તે
ભવન્ત્યમ્બ જીવાઃ શિવત્વેન કેચિત્ ॥ ૫॥

શરીરેઽતિકષ્ટે રિપૌ પુત્રવર્ગે

સદાભીતિમૂલે કલત્રે ધને વા ।
ન કશ્ચિદ્વિરજ્યત્યહો દેવિ ચિત્રં
કથં ત્વત્કટાક્ષં વિના તત્ત્વબોધઃ ॥ ૬॥

શરીરે ધનેઽપત્યવર્ગે કલત્રે
વિરક્તસ્ય સદ્દેશિકાદિષ્ટબુદ્ધેઃ ।
યદાકસ્મિકં જ્યોતિરાનન્દરૂપં
સમાધૌ ભવેત્તત્ત્વમસ્યમ્બ સત્યમ્ ॥ ૭॥

મૃષાન્યો મૃષાન્યઃ પરો મિશ્રમેનં
પરઃ પ્રાકૃતં ચાપરો બુદ્ધિમાત્રમ્ ।
પ્રપઞ્ચં મિમીતે મુનીનાં ગણોઽયં
તદેતત્ત્વમેવેતિ ન ત્વાં જહીમઃ ॥ ૮॥

નિવૃત્તિઃ પ્રતિષ્ઠા ચ વિદ્યા ચ શાન્તિ-
સ્તથા શાન્ત્યતીતેતિ પઞ્ચીકૃતાભિઃ ।
કલાભિઃ પરે પઞ્ચવિંશાત્મિકાભિ-
સ્ત્વમેકૈવ સેવ્યા શિવાભિન્નરૂપા ॥ ૯॥

અગાધેઽત્ર સંસારપઙ્કે નિમગ્નં
કલત્રાદિભારેણ ખિન્નં નિતાન્તમ્ ।
મહામોહપાશૌઘબદ્ધં ચિરાન્માં
સમુદ્ધર્તુમમ્બ ત્વમેકૈવ શક્તા ॥ ૧૦॥

સમારભ્ય મૂલં ગતો બ્રહ્મચક્રં
ભવદ્દિવ્યચક્રેશ્વરીધામભાજઃ ।
મહાસિદ્ધિસંઘાતકલ્પદ્રુમાભા-
નવાપ્યામ્બ નાદાનુપાસ્તે ચ યોગી ॥ ૧૧॥

ગણેશૈર્ગ્રહૈરમ્બ નક્ષત્રપઙ્ક્ત્યા
તથા યોગિનીરાશિપીઠૈરભિન્નમ્ ।
મહાકાલમાત્માનમામૃશ્ય લોકં
વિધત્સે કૃતિં વા સ્થિતિં વા મહેશિ ॥ ૧૨॥

લસત્તારહારામતિસ્વચ્છચેલાં
વહન્તીં કરે પુસ્તકં ચાક્ષમાલામ્ ।
શરચ્ચન્દ્રકોટિપ્રભાભાસુરાં ત્વાં

સકૃદ્ભાવયન્ભારતીવલ્લભઃ સ્યાત્ ॥ ૧૩॥

સમુદ્યત્સહસ્રાર્કબિમ્બાભવક્ત્રાં
સ્વભાસૈવ સિન્દૂરિતાજાણ્ડકોટિમ્ ।
ધનુર્બાણપાશાઙ્કુશાન્ધારયન્તીં
સ્મરન્તઃ સ્મરં વાપિ સંમોહયેયુઃ ॥ ૧૪॥

મણિસ્યૂતતાટઙ્કશોણાસ્યબિમ્બાં
હરિત્પટ્ટવસ્ત્રાં ત્વગુલ્લાસિભૂષામ્ ।
હૃદા ભાવયંસ્તપ્તહેમપ્રભાં ત્વાં
શ્રિયો નાશયત્યમ્બ ચાઞ્ચલ્યભાવમ્ ॥ ૧૫॥

મહામન્ત્રરાજાન્તબીજં પરાખ્યં
સ્વતો ન્યસ્તબિન્દુ સ્વયં ન્યસ્તહાર્દમ્ ।
ભવદ્વક્ત્રવક્ષોજગુહ્યાભિધાનં
સ્વરૂપં સકૃદ્ભાવયેત્સ ત્વમેવ ॥ ૧૬॥

તથાન્યે વિકલ્પેષુ નિર્વિણ્ણચિત્તા-
સ્તદેકં સમાધાય બિન્દુત્રયં તે ।
પરાનન્દસંધાનસિન્ધૌ નિમગ્નાઃ
પુનર્ગર્ભરન્ધ્રં ન પશ્યન્તિ ધીરાઃ ॥ ૧૭॥

ત્વદુન્મેષલીલાનુબન્ધાધિકારા-
ન્વિરિઞ્ચ્યાદિકાંસ્ત્વદ્ગુણામ્ભોધિબિન્દૂન્ ।
ભજન્તસ્તિતીર્ષન્તિ સંસારસિન્ધું
શિવે તાવકીના સુસંભાવનેયમ્ ॥ ૧૮॥

કદા વા ભવત્પાદપોતેન તૂર્ણં
ભવામ્ભોધિમુક્તીર્ય પૂર્ણાન્તરઙ્ગઃ ।
નિમજ્જન્તમેનં દુરાશાવિષાબ્ધૌ
સમાલોક્ય લોકં કથં પર્યુદાસ્સે ॥ ૧૯॥

કદાવા હૃષીકાણિ સામ્યં ભજેયુઃ
કદા વા ન શત્રુર્ન મિત્રં ભવાનિ ।
કદા વા દુરાશાવિષૂચીવિલોપઃ
કદા વા મનો મે સમૂલં વિનશ્યેત્ ॥ ૨૦॥

નમોવાકમાશાસ્મહે દેવિ યુષ્મ-
ત્પદામ્ભોજયુગ્માય તિગ્માય ગૌરિ ।
વિરિઞ્ચ્યાદિભાસ્વત્કિરીટપ્રતોલી-
પ્રદીપાયમાનપ્રભાભાસ્વરાય ॥ ૨૧॥

કચે ચન્દ્રરેખં કુચે તારહારં
કરે સ્વાદુચાપં શરે ષટ્પદૌઘમ્ ।
સ્મરામિ સ્મરારેરભિપ્રાયમેકં
મદાઘૂર્ણનેત્રં મદીયં નિધાનમ્ ॥ ૨૨॥

શરેષ્વેવ નાસા ધનુષ્વેવ જિહ્વા
જપાપાટલે લોચને તે સ્વરૂપે ।
ત્વગેષા ભવચ્ચન્દ્રખણ્ડે શ્રવો મે
ગુણે તે મનોવૃત્તિરમ્બ ત્વયિ સ્યાત્ ॥ ૨૩॥

જગત્કર્મધીરાન્વચોધૂતકીરાન્
કુચન્યસ્તહારાન્કૃપાસિન્ધુપૂરાન્ ।
ભવામ્ભોધિપારાન્મહાપાપદૂરાન્
ભજે વેદસારાઞ્શિવપ્રેમદારાન્ ॥ ૨૪॥

સુધાસિન્ધુસારે ચિદાનન્દનીરે
સમુત્ફુલ્લનીપે સુરત્રાન્તરીપે ।
મણિવ્યૂહસાલે સ્થિતે હૈમશાલે
મનોજારિવામે નિષણ્ણં મનો મે ॥ ૨૫॥

દૃગન્તે વિલોલા સુગન્ધીષુમાલા
પ્રપઞ્ચેન્દ્રજાલા વિપત્સિન્ધુકૂલા ।
મુનિસ્વાન્તશાલા નમલ્લોકપાલા
હૃદિ પ્રેમલોલામૃતસ્વાદુલીલા ॥ ૨૬॥

જગજ્જાલમેતત્ત્વયૈવામ્બ સૃષ્ટં
ત્વમેવાદ્ય યાસીન્દ્રિયૈરર્થજાલમ્ ।
ત્વમેકૈવ કર્ત્રી ત્વમેકૈવ ભોક્ત્રી
ન મે પુણ્યપાપે ન મે બન્ધમોક્ષૌ ॥ ૨૭॥

ઇતિ પ્રેમભારેણ કિઞ્ચિન્મયોક્તં
ન બુધ્વૈવ તત્ત્વં મદીયં ત્વદીયં ।

વિનોદાય બાલસ્ય મૌર્ખ્યં હિ માત-
સ્તદેતત્પ્રલાપસ્તુતિં મે ગૃહાણ ॥ ૨૮॥ ં
ઇતિ શ્રીમત્પરમહંસપરિવ્રાજકાચાર્યસ્ય
શ્રીગોવિન્દભગવત્પૂજ્યપાદશિષ્યસ્ય
શ્રીમચ્છંકરભગવતઃ કૃતૌ
દેવીભુજંગસ્તોત્રં સમ્પૂર્ણમ્ ॥

Encoded by Sridhar SeshagiriM

*Devibhujangastotram*
pdf was typeset on February 2, 2024

Please send corrections to *sanskrit@cheerful.com*